# RAMAKRISHNA MISSION VIDYAMANDIRA

**(Residential Autonomous College affiliated to University of Calcutta)**

**B.A./B.Sc. FOURTH SEMESTER EXAMINATION, MAY 2017**
**SECOND YEAR [BATCH 2015-18]**
**SANSKRIT (General)**
**Paper :** IV

Date : 23/05/2017
Time : 11 am – 2 pm
Full Marks : 75

1. यथेच्छं प्रश्न**द्वय**स्योत्तरं प्रदेयम्। [2×15]
   क) रामायणस्य रचयिता कः? तत्र कति काण्डानि सन्ति? तेषां नामोल्लिख्यताम्। समाजे साहित्ये च तस्य प्रभाव आलोच्यताम्।
   ख) पञ्चतन्त्रस्य हितोपदेशस्य च रचयिता कः ? तयोः ग्रन्थयोः परिचयः प्रदीयताम्।
   ग) किं नाम गीतिकाव्यम्? गीतिकाव्यविषये एकः प्रबन्धः समासेनोपस्थाप्यताम्।
   घ) भासस्य नाटकानां नामानि उल्लिख्य तेषु नाटकद्वयम् आलोच्यताम्।

2. यथाभिरुचि टीका**द्वयं** लेख्यम्। [2×5]
   क) श्रीमद्भगवद्गीता
   ख) रघुवंशम्
   ग) कादम्बरी
   घ) राजतरङ्गिणी

3. यथाभिमत**मेकस्य** प्रश्नस्योत्तरं देयम्। [1×10]
   क) ईशोपनिषदि विद्याविद्ययोः स्वरूपं विशद्यताम्।
   ख) ईशोपनिषदः प्रथममन्त्रस्य तात्पर्यं प्रतिपाद्यताम्।

4. क) **एका** व्याख्या करणीया। [1×5]
   i) हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।
   तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये।।
   ii) अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।
   ततो भूय इव ते तमो य उ विद्यायां रताः।।

   **OR,**

   ख) वङ्गभाषया आङ्गलभाषया वा यथेच्छं मन्त्रस्य **एकस्या**नुवादः कार्यः। [1×5]
   i) सम्भूतिं च विनाशं च यस्तद्वेदोभयं सह।
   विनाशेन मृत्युं तीर्त्वा सम्भूत्यामृतमश्नुते।।
   ii) कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।
   एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे।।

5. प्रश्न**स्यैक**स्योत्तरं समाधेयम्। [1×10]
   क) 'स च सर्वगुणोपेतः कौशल्यानन्दवर्धनः' —इत्यस्य तात्पर्यं निरूप्यताम्।
   ख) रामायणरचनायाः पटभूमिका आलोच्यताम्।

6. आङ्गलभाषया वङ्गभाषया वा **एकस्या**नुवादः करणीयः। [1×4]

क) इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः।
नियतात्मा महावीर्यो द्युतिमान् धृतिमान् वशी।।

ख) जनकस्य कुले जाता देवमायेव निर्मिता।
सर्वलक्षणसम्पन्ना नारीणामुत्तमा बधूः।।

7. क) **एकस्य** व्याख्या कार्या। [1×6]

i) यावत् स्थास्यन्ति गिरयः सरितश्च महीतले।
तावद्रामायणकथा लोकेषु प्रचरिष्यति।।

ii) सीताप्यनुगता रामं शशिनं रोहिणी यथा।
पौरैरनुगतं दूरं पित्रा दशरथेन च।।

**OR,**

ख) यथेच्छं प्रश्न**त्रितय**स्य समाधानं कार्यम्। [3×2]

i) नारदेन वाल्मीकिं प्रति किमुक्तम्?

ii) रामायणे वर्णितः आदिश्लोकः कः?

iii) आदिकविः क आसीत्?

iv) रामस्य वनवासगमनस्य कारणं किम्?

v) रामायणस्य द्वितीयकाण्डस्य नाम किम्?

———— × ————